# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-शास्त्री-३ | प्रश्नपत्रम् – ८ | गुणाः – ७० |
| विषयः – धर्मशास्त्रम् | सत्रम्- ६ (षष्ठम्) (OLD) | समयः- ०८:०० तः ११:०० |
| दिनाङ्कः – ०४/०४/२०२० | सन्दर्भग्रन्थः – मनुस्मृतिः (अध्यायः 11-12) | |

---

### प्रथमान्वितिः (Unit 1)
गुणाः

**प्रश्नः १ अधोलिखितयोः द्वयो ससन्दर्भ व्याख्याकार्या।** १०

१ आपत्कालेन यो धर्मं कुरुतेऽनापदि द्विजः।
स नाप्नोति फलं तस्य परत्रेति विचारितम्।।

२ सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स कार्ये निर्दग्धे मुच्यते किल्बिषात्ततः।।

३ इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून्।
हन्त्यल्पदक्षिणोयज्ञस्तस्मान्नाल्पधनोयजेत् ।।

**प्रश्नः २ द्वयोः कम्पयकेम् उत्तरयत।** १०

१ पतितलक्षणं विलिख्य महापापानां विवरणं ग्रन्थानुगुणं विविच्यताम्।

२ मनुस्मृतेः परिचयं सविस्तरं लिखत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ कयोश्चिद् द्वयोः ससन्दर्भ भावार्थोलेख्यः।** १०

१ मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च।
कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम्।।

२ यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति।
तथा दुश्चरिते सर्वे वेदे त्रिवृति मज्जति।।

३ हविष्यमुखाऽनुसरेत्प्रतिस्रोतः सरस्वतीम्।
जयेद्वानियताहारस्त्रिर्वै वेदस्य संहिताम्।।

**प्रश्नः ४ कस्यापि एकस्य उत्तरं सविस्तरं लिखत।** १०

१ धर्मेण हीना पशुभिः समानाः इत्युक्तिं व्याख्यायत।

२ मनुस्मृत्यनुरूपं गुप्तपापानां प्रायश्चितनिरुपणं क्रियताम्।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ कयोश्चिद् द्वयोः ससन्दर्भ विशेषार्थं लिखत।** १०

१ शुभाशुभफलं कर्म मनोवाग्देहसम्भवम्।
कर्मजा गतयो नृणामुत्तमाधममध्यमाः।

२ अनाम्रा तेषु धर्मेषु कथं स्यादिति चेद्भवेत्।
य शिष्टा ब्राह्मणा ब्रयूः स धर्मः स्यादशङ्कितः।।

३ यां यां योनिंतु जीवोऽयं येनयेनेह कर्मणा।
क्रमशो याति लोकेऽस्मिन् तत्तत्सर्वं निबोध्यते।।

**प्रश्नः ६ कस्यापि एकस्य उत्तरं सविस्तरं लिखत।** १०

१ क्षत्रियादिवधप्रायश्चित्तविषये यथाग्रन्थं विवेचनं करुत।

२ सत्त्वादिलक्षणं सविस्तृतं मनुस्मृत्यानुगुणं विमृशत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ केषाञ्चन दशानां लघुत्तराणि लेख्यानि।** १०

१ मनुस्मृतौ कति अध्यायाः सन्ति?

२ मनुस्मृतिः इत्यत्र कः समासः?

३ मनुस्मृतिः कस्य शास्त्रस्य ग्रन्थः अस्ति?

४ प्रायश्चित्तस्य कोऽर्थः?

५ पञ्चमहापातकानि कानि सन्ति?

६ स्नातकाः कति विद्याः विद्यन्ते?

७ एकादशाध्याये कति श्लोकाः सन्ति?

८ सुरायाः कित प्रकाराः सन्ति?

९ चान्द्रायणव्रतस्य फलश्रुतिः का?

१० सङ्कल्पः केन क्रियते?

११ अज्ञेभ्यः के श्रेष्ठाः सन्ति?

१२ ब्राह्मणस्य मोक्षसाधनानि कति सन्ति?

१३ शिष्टाः के सन्ति?

१४ भृगुऋषेः पितुः नाम किम्?

१५ द्वादशाध्याये कति श्लोकाः सन्ति?

**************************